2025 III 05 0930 Seat No. | | | | | |

Time : 3 Hours

# SANSKRIT (Third Language)

Subject Code

| S | 1 | 1 | 3 | 5 |
|---|---|---|---|---|

Total No. of Questions : 52 (Printed Pages : 12) Maximum Marks : 80

**सूचना :** (1) प्रश्नपत्रे आहत्य 52 प्रश्नाः सन्ति।

(2) 1 तः 20 पर्यन्तम् वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नस्य सूचनानुसारं चतुर्भ्यः प्रदत्त विकल्पेभ्यः योग्यं उत्तरं चित्वा लिखत।

(3) प्रश्नानां क्रमाङ्काः तथा उपप्रश्नाम् अक्षराणि स्पष्टतया लेखनीयानि।

(4) दक्षिणभागे दर्शिताङ्काः गुणाङ्काः सन्ति।

(5) सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः।

(6) स्वभाषा नाम हिन्दी, मराठी, कोंकणी, आङ्ग्लभाषा वा।

- **अधोलिखितवाक्येषु रिक्तस्थानानि पूरयितुं योग्यं पदं चिनुत—**

(1) मम जुवारी ...................... सह मेलनं भवति। 1

- नदीम्
- नद्या
- नद्यै
- नद्याः

(2) ........................ तृप्तिपर्यन्तं प्रभूतं घासादिकम् अयच्छत्। 1

- तया
- ताम्
- तस्यै
- तस्याः

(3) तदा ........................ उक्तम्। 1

- हस्ती
- हस्तिना
- हस्तिनौ
- हस्तिने

(4) महाकवेः कालिदासस्य रचनानां भाषा अतीव ..................... अस्ति। 1

- सरला
- सरलम्
- सरल
- सरलः

(5) आदावेव – इत्यस्य सन्धिविग्रहं कुरुत। 1

- आदौ + एव
- आदौ + ऐव
- आदा + वेव
- आद + एव

(6) पर्वतेऽस्मिन् – इत्यस्य सन्धिविग्रहं कुरुत। 1

- पर्वते + स्मिन्
- पर्वत + अस्मिन्
- पर्वते + अस्मिन्
- पर्वतः + अस्मिन्

(7) 'वित्तम्' इत्यस्य उचितं पर्यायपदं चित्वा लिखत। 1

- जलम्
- धनम्
- दानम्
- पत्रम्

(8) 'स्थविरः' इत्यस्य उचितं पर्यायपदं चित्वा लिखत। 1

- आदर्शः
- नृपः
- पण्डितः
- वृद्धः

(9) 'मत्स्यः' इत्यस्य उचितं पर्यायपदं चित्वा लिखत। 1

- मीनः
- मयूरः
- रत्नाकरः
- सिकता

(10) 'खल:' इत्यस्य उचितं विलोमपदं चित्वा लिखत। 1

- सज्जन:
- अध:
- चतुर:
- दोष:

(11) 'विवाद:' इत्यस्य उचितं विलोमपदं चित्वा लिखत। 1

- वियोग:
- संवाद:
- अनादर:
- निन्दा

(12) 'स्मरणम्' इत्यस्य उचितं विलोमपदं चित्वा लिखत। 1

- बुद्धि:
- विस्मरणम्
- विकार:
- विकास:

(13) 'स्था' धातो: क्त्वान्तम् अव्ययं चित्वा लिखत। 1

- स्थात्वा
- स्थित्वा
- स्थिता
- स्थापयित्वा

(14) 'गम्' धातोः तुमन्तम् अव्ययम् चित्वा लिखत। 1

- गमितुम्
- गमयितुम्
- गन्तुम्
- आगम्य

(15) 'गोपालकः' इत्यस्य उचितं समासविग्रहं चिनुत। 1

- गौः पालयन्ति इति
- गो पालयति इति
- गां पालयति इति
- गोपालनम् इति

(16) 'मूलकारणम्' इत्यस्य उचितं समासनाम चिनुत। 1

- सप्तमीतत्पुरुषः
- कर्मधारयः
- बहुव्रीहिः
- अव्ययीभावः

- रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणवाचकं योग्यं पदं चिनुत।

(17) राष्ट्रध्वजस्य सम्मानरक्षार्थं वयं तत्पराः भवेम। 1

- कस्मै
- कस्य
- कस्याः
- किं

(18) अर्जुनः आत्मानं <u>अग्नौ</u> क्षेप्स्यति। 1

- कीदृशः
- कथं
- कदा
- कस्मिन्

- **कः कं प्रति अवदत् इति उचितं पर्यायं चित्वा लिखत।**

(19) ''ध्वजस्य मध्ये स्थितस्य चक्रस्य किमपि महत्वम् अस्ति किम् ?'' 1

- एतत् वाक्यं डेविडः शुचिं प्रति अवदत्।
- एतत् वाक्यं तेजिन्दरः डेविडं प्रति अवदत्।
- एतत् वाक्यं शुचिः सलीमं प्रति अवदत्।
- एतत् वाक्यं तेजिन्दरः शुचिं प्रति अवदत्।

(20) ''देव! दृष्टिप्रसादं कुरु।'' 1

- एतत् वाक्यं वृद्धश्रृगालः श्रृगालं प्रति अवदत्।
- एतत् वाक्यं मालती माधवं प्रति अवदत्।
- एतत् वाक्यं वृद्धश्रृगालः कर्पूरतिलकं प्रति अवदत्।
- एतत् वाक्यं श्रीकृष्णः अर्जुनं प्रति अवदत्।

➤ **सूचनानुसारं लिखत—**

(21) जनाः एतान् जलप्रवाहान् तीर्थानि मन्यन्ते। (वाक्यं लङ् लकारे लिखत) 1

(22) छात्रान् अधिकृत्य सः विपुलानि कार्याणि करोति स्म। ('स्म' अव्ययं निष्कासयत) 1

➤ **प्रश्नानाम् उत्तराणि <u>एकवाक्येन संस्कृतभाषया</u> लिखत।**

(23) भाऊसाहेबस्य मनसि कं प्रति दृढा भक्तिः आसीत् ? 1

(24) माण्डवी कदा खिन्ना भवति ? 1

(25) जयद्रथः कस्य मूलकारणं आसीत् ? 1

(26) गोमन्तकस्य लोकजीवनं कीदृशं विद्यते ? 1

- **वाक्यांशयोः मेलनं कृत्वा लिखत।**

| | | | | |
|---|---|---|---|---|
| (27) पेडणेभागः | 1 | ➤ | नाट्यादीनां कलानां क्षेत्रे प्रसिद्धः। | 1 |
| (28) फोण्डामहालः | 1 | ➤ | वनसम्पदा समृद्धः। | 1 |
| | | ➤ | गृहनिर्माणकलायां ख्यातः। | |

➤ **एकस्य सुभाषितस्य अनुवादं स्वभाषया लिखत।** 2

(29) यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।

लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥

**अथवा**

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्।

वार्धके दुःखहरणं हितं सद्ग्रन्थवाचनम्॥

➤ **प्रश्नानाम् उत्तराणि स्वभाषया लिखत।**

(30) गोमन्तकीया कृषिव्यवस्था निसर्गानुरूपा कथं विद्यते ? 2

**अथवा**

मूर्च्छां दूरीकृत्य माधवः मालतीं किं अवदत् ?

(31) जयद्रथरक्षणार्थं कौरवैः किं किं कृतम् ? 2

**अथवा**

भाऊसाहेब बान्दोडकरस्य कार्यविषये लिखत।

➤ **सुभाषितानि पूर्णानि, शुद्धानि च लिखत।**

(32) केशवं ....................।......................॥ 2

(33) कुसुमं ....................।................॥ 2

(34) न सदा ....................।.................॥ 2

➤ **एकस्य गद्यखण्डस्य स्वभाषया अनुवादं कृत्वा लिखत।** 4

(35) प्रारम्भे मम प्रवाहे मधुरं जलं विद्यते। तज्जलं जनानां कृते पेयं स्नानयोग्यं चास्ति। मम जलेन कृषीवलाः क्षेत्राणि सिञ्चन्ति। येन जीवानां कृते बहुधान्यस्य फलपुष्पमूलानाञ्च प्राप्तिः भवति। तेन सर्वत्र सुभिक्षं भवति। किन्तु यदाहं सागरान्तिकं प्राप्नोमि, तदा शनैः शनैः मम जलं क्षारं भवति।

**अथवा**

सलीमः – श्रुणु, केशरवर्णः शौर्यस्य, श्वेतः शान्तेः, हरितश्च समृद्धेः सूचकः अस्ति। स्वयं च अयं ध्वजः अनेकत्वे एकत्वस्य द्योतकः।

शुचिः – किम् एतासां पट्टिकानाम् अन्यदपि महत्त्वम् ?

डेविडः – आम्। ध्वजस्य उपरि स्थिता केशरपट्टिका अग्निशिखा इव ऊर्जस्वितायाः उत्साहस्य च सूचिका। मध्ये स्थिता श्वेतपट्टिका सात्त्विकतायाः निर्मलतायाः च द्योतिका। अधः स्थिता हरितपट्टिका समृद्धेः प्रगतेश्च सङ्केतिका।

➤ **अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण <u>संस्कृतभाषया</u> उत्तरत।**

पुराणकाले पर्वतेऽस्मिन् 108 (अष्टोत्तरशतम्) जलप्रवाहाः आसन् इति श्रूयते। जनाः एतान् जलप्रवाहान् तीर्थानि मन्यन्ते। एते जलप्रवाहाः गणेशतीर्थं, कपिलतीर्थं, मुरलीधरतीर्थम् इत्यादिभिः नामभिः प्रसिद्धाः। तेषां मधुरं शीतं च जलम् औषधियुक्तमपि विद्यते। यतः अत्र स्थितैः वनस्पतिरसैः भूमिस्थितधातुभिश्च औषधियुक्तं जातं तज्जलम्। पर्वतशिखरस्य अधः नातिदूरे 'थळ' इति स्थानमस्ति, यत्र पूर्वम् अनेके प्रसिद्धाः सङ्गीतोपासकाः अखण्डतया सङ्गीतसाधनया शिवाराधनां कुर्वन्ति स्म।

**प्रश्नाः**

(36) 'थळ' इति स्थाने सङ्गीतोपासकाः किं कुर्वन्ति स्म ? (दशपदैः उत्तरत) 2

(37) पर्वतस्थितं जलं कथम् औषधियुक्तं जातम् ? (दशपदैः उत्तरत) 2

(38) 'स्थलम्' इति पदस्य पर्यायवाचिपदं गद्यखण्डात् चित्वा लिखत। 1

➤ **अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत।**

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः॥

कृपणेन समो दाता न भूतो न भविष्यति।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति॥

**प्रश्नाः**

(39) नद्यः वृक्षाः च स्वयं किं किं न कुर्वन्ति ? (दशपदैः उत्तरत) 2

(40) 'कृपणः' इति पदस्य विलोमपदं पद्यखण्डात् चित्वा लिखत। 1

• **अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतभाषया उत्तरत।**

सत्पुरुषाः यानि कार्याणि कुर्वन्ति सः सदाचारः उच्यते। 'आचारः परमो धर्मः' इत्यपि कथ्यते। सदाचारेण मनुजः स्वयम् आनन्दं प्राप्नोति तथा अन्येभ्योऽपि आनन्दं ददाति। सदाचारस्य नियमाः सन्ति यथा, प्रातः काले उत्थाय मातापितरौ, वृद्धान् गुरून् च प्रणमेत्। तेषाम् आज्ञां पालयेत्, तान् सेवेत। सदाचारी नरः कदापि असत्यं न वदति। सः हृदयेन सरलः, वचसा सत्यवादी व्यवहारेण च कुशलः भवति।

**प्रश्नाः**

(41) सदाचारस्य के नियमाः सन्ति ? (दशपदैः उत्तरत) 2

(42) सदाचारेण किं भवति ? (दशपदैः उत्तरत) 2

(43) परिच्छेदात् एकं ल्यबन्तम् अव्ययं चित्वा लिखत। 1

(44) 'निपुणः' इत्यस्य पर्यायवाचिपदं गद्यखण्डात् चित्वा लिखत। 1

• **अधस्तनं पद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया लिखत।**

शान्तितुल्यं तपो नास्ति न सन्तोषात् परं सुखम्।

न तृष्णायाः परो व्याधिः न च धर्मो दयापरः॥

विद्या ददाति विनयं विनयात् याति पात्रताम्।

पात्रत्वात् धनमाप्नोति धनाद्धर्मं ततः सुखम्॥

(45) पात्रत्वात् किं आप्नोति ? 1

(46) कस्मात् परं सुखं नास्ति ? 1

(47) का विनयं ददाति ? 1

**अधोलिखितयोः परिच्छेदयोः एकस्य अनुवादं स्वभाषया लिखत।** 3

(48) भ्रष्टाचारस्य मूलं लोभः वर्तते। लोभः एव मनुजं अयोग्यमार्गं नयति। यदि स्वकष्टार्जितेन धनेन नरः सन्तुष्टः भवेत् तर्हि भ्रष्टाचारस्य जन्म एव न भविष्यति। किन्तु सम्प्रति युगे बहवः जनाः अल्पसन्तुष्टाः दृश्यन्ते। अतः ते कदाचित् न्याय्यमार्गं न अनुसरन्ति।

**अथवा**

माता—वत्स! आपणं गत्वा लवणं गुडं च आनयतु।

रमेशः — भवती रमां वदतु अम्ब!

माता — सा वस्त्राणि क्षालयति। तस्याः अन्यानि अपि बहूनि कार्याणि सन्ति।

रमेशः — ममापि पठनं बहु अस्ति।

माता — अनन्तरं भवान् पठतु।

रमेशः — अस्तु। भवती शीघ्रं धनं स्यूतं च ददातु।

(49) **कोष्ठकात् उचितपदानि चित्वा सार्थकवाक्यानि लिखत।** 4

| | | | |
|---|---|---|---|
| सैनिकाः | औषधं | नमामः | (1) |
| वयं | स्वाध्यायं | कुर्वन्ति | (1) |
| वैद्यः | देशरक्षणं | लिखथः | (1) |
| युवां | ईश्वरं | ददाति | (1) |

(50) **मञ्जूषायां दत्तपदानां साहाय्येन कथापूर्तिं कृत्वा कथां पुनः लिखत।** 4

(आगतवान्, क्रयणार्थम्, नूतनम्, गृहं, अग्रजः कुतः, अग्रिमे, रूप्यकाणि)

प्रणवः – चिन्मय! .......................... युतकं किम् ? कति रूप्यकाणि दत्तवान् भवान् ?

चिन्मयः – अहं पञ्चाशत् ............................ दत्तवान्। कथम् अस्ति एतत् ?

प्रणवः – बहु सम्यक् अस्ति। .................... आनीतवान् भवान् ?

चिन्मयः – गान्धीनगरे वस्त्र-आपणः अस्ति ननु ? ततः आनीतवान्।

प्रणवः – अस्तु, भवान् ह्यः किमर्थं कक्ष्यां न .................... ?

चिन्मयः – मुम्बईतः ................... आगतवान् आसीत्। तेन सह ............ अहं विपणिं गतवान् आसम्।

प्रणवः – राघवः आगतवान् आसीत् किम् ? भवान् तं मम ............ किमर्थं न आनीतवान् ?

चिन्मयः – सः रात्रौ एव गतवान्। ................... मासे सः पुनः आगमिष्यति।

(51) **अधोलिखित वाक्यानि घटनाक्रमानुसारं लिखत।** 4

- कर्पूरतिलकसमीपं गत्वा तस्य स्तुतिम् अकरोत्।
- ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती आसीत्।
- सः महापङ्कात् बहिः गन्तुम् असमर्थः अभवत्।

- श्रृगाला: तं मारयित्वा मासचतुष्टयस्य भोजनव्यवस्थां कर्तुम् इच्छन्ति।
- कर्पूरतिलक: श्रृगालदर्शितवर्त्मना अधावन् महापङ्के निमग्न:।
- हस्ती श्रृगालानां भोजनविषय: अभवत्।
- तस्य मरणं साधयितुं वृद्धश्रृगालेन प्रतिज्ञा कृता।
- ''राज्याभिषेकार्थं सत्वरम् आगन्तव्यम्'' इति उक्तवान्।

(52) 'कल्पवृक्ष: **अथवा** 'सुभाषितानि' एतयो: कमपि **एकं** विषयम् अधिकृत्य संस्कृतभाषया **अष्ट** वाक्यानि लिखत। 4

**अथवा**

(52) **चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन अष्ट वाक्यानि लिखत।** 4

(टोपिकाविक्रेता, बका:, उद्यानम्, बालिका, नौका, खगा:, पुष्पाणि, क्रीडन्ति)

